श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकषष्टितमः सर्गः ॥

## मधुनोपलब्धस्य वरस्य लवणासुरबलस्य तदत्याचारस्य च वर्णनं कृत्वा ततः प्राप्तं भयं दूरीकर्तुं श्रीराघवं प्रति मुनिभिः प्रार्थनाकरणम्

ब्रुवद्भिरेवमृषिभिः काकुत्स्थो वाक्यमब्रवीत्।
किं कार्यं ब्रूत मुनयो भयं तावदपैतु वः॥ **7.61.1** ॥

तथा ब्रुवति काकुत्स्थे भार्गवो वाक्यमब्रवीत्।
भयानां शृणु यन्मूलं देशस्य च नरेश्वर॥ **7.61.2** ॥

पूर्वं कृतयुगे राजन् दैतेयः सुमहामतिः।
लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः॥ **7.61.3** ॥

ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः।
सुरैश्च परमोदारैः प्रीतिस्तस्यातुलाभवत्॥ **7.61.4** ॥

स मधुर्वीर्यसम्पन्नो धर्मे च सुसमाहितः।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः॥ **7.61.5** ॥

शूलं शूलाद् विनिष्कृष्य महावीर्यं महाप्रभम्।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह॥ **7.61.6** ॥

त्वयायमतुलो धर्मो मत्प्रसादकरः कृतः।
प्रीत्या परमया युक्तो ददाम्यायुधमुत्तमम्॥ **7.61.7** ॥

यावत् सुरैश्च विप्रैश्च न विरुध्येर्महासुर।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति ॥ 7.61.8 ॥

यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः।
तं शूलो भस्मसात्कृत्वा पुनरेष्यति ते करम् ॥ 7.61.9 ॥

एवं रुद्राद् वरं लब्ध्वा भूय एव महासुरः।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥ 7.61.10 ॥

भगवन् मम वंशस्य शूलमेतदनुत्तमम्।
भवेत् तु सततं देव सुराणामीश्वरो ह्यसि ॥ 7.61.11 ॥

तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः।
प्रत्युवाच महादेवो नैतदेवं भविष्यति ॥ 7.61.12 ॥

मा भूत् ते विफला वाणी मत्प्रसादकृता शुभा।
भवतः पुत्रमेकं तु शूलमेतद् भविष्यति ॥ 7.61.13 ॥

यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते।
अवध्यः सर्वभूतानां शूलहस्तो भविष्यति ॥ 7.61.14 ॥

एवं मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम्।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम् ॥ 7.61.15 ॥

तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा ॥ 7.61.16 ॥

तस्याः पुत्रो महावीर्यो लवणो नाम दारुणः।
बाल्यात्प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥ 7.61.17 ॥

तं पुत्रं दुर्विनीतं तु दृष्ट्वा क्रोधसमन्वितः।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत् ॥ 7.61.18 ॥

स विहाय इमं लोकं प्रविष्टो वरुणालयम्।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्॥ **7.61.19** ॥

स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा।
सन्तापयति लोकांस्त्रीन् विशेषेण च तापसान्॥ **7.61.20** ॥

एवम्प्रभावो लवणः शूलं चैव तथाविधम्।
श्रुत्वा प्रमाणं काकुत्स्थ त्वं हि नः परमा गतिः॥ **7.61.21** ॥

बहवः पार्थिवा राम भयार्तैर्ऋषिभिः पुरा।
अभयं याचिता वीर त्रातारं न च विद्महे॥ **7.61.22** ॥

ते वयं रावणं श्रुत्वा हतं सबलवाहनम्।
त्रातारं विद्महे तात नान्यं भुवि नराधिपम्।
तत् परित्रातुमिच्छामो लवणाद् भयपीडितान्॥ **7.61.23** ॥

इति राम निवेदितं तु ते
    भयजं कारणमुत्थितं च यत्।
विनिवारयितुं भवान् क्षमः
    कुरु तं काममहीनविक्रम॥ **7.61.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकषष्टितमः सर्गः॥